Roll No : .......................................

Total No. of Questions : **12** ]                [ Total No. of Printed Pages : **4**

# AP–496

## M.A. (Final) Examination, 2021

## SANSKRIT

### (वर्ग 'आ'—वैदिक साहित्य)

Paper - VIII

### (ब्राह्मण, उपनिषद् तथा वैदिक सहायक ग्रन्थ)

*Time : 1½ Hours* ]                [ *Maximum Marks : **100***

**(खण्ड–अ)**                **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**(खण्ड–ब)**                **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**(खण्ड–स)**                **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**                प्रत्येक 2

1. सर्वे प्रश्नाः अनिवार्या। शब्द-सीमा **50** शब्दाः। द्वौ संस्कृतेन लिखत।

   (i) तेजो वै ब्रह्मवर्चसं गायत्री॥ इति। ऐतरेयब्राह्मणोक्तिरियं प्रतिपादनीया।

   (ii) यदाहुर्यदन्यो जुहोत्यथ योऽनु चाऽऽह यजति च कस्मात् तं होतेत्याचक्षत इति॥ इति। —व्याख्यापूर्वक लिखत।

(iii) द्वयं वाऽइदं न तृतीयमस्ति—व्याख्यापूर्वकं लिखत।

(iv) द्वन्द्वं वै वीर्यम्। शतपथब्राह्मणोक्तिरियं प्रतिपादनीया।

(v) तास्त्रिविधा ऋचः। निरुक्तानुसारेण विवेचयत।

(vi) अग्निः कस्मात् ? संस्कृते निर्वचनं कुरुत।

(vii) ततश्चत्वारि संध्यक्षराण्युत्तराणि। व्याख्या विधेया।

(viii) उत्तरेऽष्टा ऊष्माणः। संस्कृतेन व्याख्या विधेया।

(ix) ओंकारोपासनायाः फलं प्रतिपादयत।

(x) सा कतमा ऋक् ? कतमत्तत्साम ? कतमो वा स उद्गीथः ?

**खण्ड–ब** प्रत्येक 8

**नोट** :– अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः। प्रश्न संख्या 4, 5 अनिवार्याः सन्ति। (शब्द-सीमा **200** शब्दाः)।

2. ऊतयः खलु वै ता नाम याभिर्देवा यजमानस्य

हवमायन्ति ये वै पन्थानो याः स्रुतयस्त

उ एवैतत्स्वर्गयाणा यजमानस्य भवन्ति।

व्याख्या विधेया।

**अथवा**

तस्माद् विचक्षणवतीमेव वाचं वदेत् सत्योत्तरा

हैवास्य वागुदिता भवति भवति। व्याख्या विधेया।

3. शतपथब्राह्मणस्य प्रथमाध्यायस्य महत्त्वं प्रकटयत।

**अथवा**

प्रायणीयकर्म प्रतिपादयत।

4. ततो देवा एतं वज्रं ददृशुः। यदपे वज्रो वाऽआपो वज्रो हि वाऽआपस्तस्माद्येनैतायन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत एतं वज्रमुदयच्छंतस्याभयेऽनाष्ट्रे निवाते यज्ञमतन्वत तथो एवैष एतं वज्रमुद्यच्छति तस्याभयेऽनाष्ट्रे निवाते यज्ञं तनुते तस्मादपः प्रणयति। व्याख्या संस्कृतमाध्यमेन विधेया।

5. अधोलिखितेषु चतुर्णां पदानां निर्वचनानि संस्कृतमाध्यमेन कुरुत—

(क) रुद्रः

(ख) वैश्वानरः

(ग) यजुः

(घ) सामन्

(ङ) अनुष्टुप्

(च) त्रिष्टुप्

(छ) जगती

(ज) घृतम्

6. निरुक्तानुसारेण द्युस्थानीय देवतानां विस्तारपूर्वकं विवेचना कार्या।

**अथवा**

इन्द्रदेवस्य स्वरूपं यथाग्रंथं निरुक्तदृशा विवेचयत।

7. अधोलिखितेषु सूत्रेषु चतुर्णां सोदाहरणं व्याख्या कार्या—

(क) युग्मौ सोष्माणौ।

(ख) तावदवग्रहान्तरम्।

(ग) प्रथमपञ्चमौ च द्वा ऊष्मणाम्।

(घ) सकाररेफलकाराश्च।

(ङ) प्रतिलोमास्तु विपर्यये त एव।

(च) ऋकार उदये कण्ठयावकारं तदुद्ग्राहवत्।

(छ) प्रकृत्येतिकरणादौ प्रगृह्याः।

(ज) सा वा स्वरभक्तिकाला।

8. ब्रह्मज्ञानं प्रतिपादनं दृष्ट्या छान्दोग्योपनिषदः महत्त्वं प्रतिपादयत।

## खण्ड–स

प्रत्येक 20

**नोट** :– निम्नलिखितेषु **द्वौ:** प्रश्नौ समाधेयौ। (शब्द-सीमा **500** शब्दा:)।

9. कयोश्चिद् **द्वयो:** ससन्दर्भ व्याख्या विधेया–

(क) आरब्धयज्ञो वा एष आरब्धदेवतो यो
दर्शपूर्णमासाभ्यां यजत आभावास्येन वा
हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि
तस्मिन् बर्हिषि दीक्षेतैषा एका दीक्षा॥

(ख) आग्नावैष्णव्यौ रूपसमृद्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्मं क्रियमाणमृगभिवदति।

(ग) तदाहुर्न पूर्वदीक्षिण: संसवोऽस्ति परिगृहीतो वा एतस्य यज्ञ: परिगृहीता देवता नैतस्याऽऽर्तिरस्त्य-परदीक्षिण एव यथा तथेति।

(घ) उन्मुच्य कृष्णाजिन मवभृथमभ्यवैति तस्मान्मुक्ता गर्भा जरायोर्जायन्ते॥ इति।

10. निम्नलिखितेषु **द्वयो:** अवतरणयो: ससन्दर्भ सटिप्पणश्च व्याख्या विधेया–

(क) नाश्नाति पितृदेवत्यो भवति यद्युऽअश्नाति देवानत्यश्नातीति स यदेवाशितयनशितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदशितमनशितं स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति।

(ख) यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽइति। एता उ हीन्द्रमवृणत वृत्रेण स्पर्धमानमेताभिर्ह्येनम हंस्तस्मादाह यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽ इति।

(ग) सा यज्ञमेव यज्ञपात्राणि प्रविवेश। ततो हैनां न शेकर्नर्हन्तुं सैषासुरघ्नी वागुद्वदति स यस्य हैवं विदुष एतामत्र वाचं प्रत्युद्वादयन्ति पापीयां सोहैवास्य सपत्ना भवन्ति।

(घ) तस्य यानि शुक्लानि च कृष्णानि च लोमानि तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नां रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नां रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव हरीणि तानि यजुषां रूपम्।

11. अपि ह्यदेवता: देवतावत् स्तूयन्ते। व्याख्या विधेया।

**अथवा**

तास्त्रिविधा: ऋच:–परोक्षकृता: प्रत्यक्षकृता: आध्यात्मिक्यश्च। व्याख्या विधेया।

12. छन्दोग्योपनिषद: प्रथमाध्यायमधिकृत्य सविस्तारं निबन्धमेकं लेखनीयम्।

**अथवा**

ऋग्प्रातिशाख्यग्रन्थस्य वैशिष्ट्यं प्रतिपादयत।